# योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ११६



षोडशाधिकशततमः सर्गः ११६

श्रीराम उवाच ।

भगवन्सर्वधर्मज्ञ चित्तेऽहंकारनामनि ।

गलिते वा गलद्रूपे लिङ्गं सत्त्वस्य किं भवेत् ।। १

श्रीवसिष्ठ उवाच ।

बलादपि हि संजाता न लिम्पन्त्याशयं सितम् ।

लोभमोहादयो दोषाः पयांसीव सरोरुहम् ।। २

मुदिताद्याः श्रियो वक्त्रं न मुञ्चन्ति कदाचन ।

गलत्यहंकारमये चित्ते गलति दुष्कृते ।। ३

वासनाग्रन्थयश्छिन्ना इव त्रुट्यन्त्यलं शनैः ।

कोपस्तानवमायाति मोहो मान्द्यं हि गच्छति ।। ४

कामः क्लमं गच्छति च लोभः क्वापि पलायते ।

नोल्लसन्तीन्द्रियाण्युच्चैः खेदः स्फुरति नोच्चकैः ।। ५

न दुःखान्यपब्रंहन्ति न वल्गन्ति सुखानि च ।

सर्वत्र समतोदेति हृदि शैत्यप्रदायिनी । ६

सुखदुःखादयस्त्वेते दृश्यन्ते यदि वा मुखे ।

दृश्यन्त एव तुच्छत्वान्नानुलिम्पन्ति ते मनः ।। ७

चित्ते गलति गीर्वाणगणस्य स्पृहणीयताम् ।

साधुर्गच्छत्युदेत्यस्य समता शीतचन्द्रिका ।। ८

उपशान्तं च कान्तं च सेव्यमप्रतिरोधि च ।

निभृतं चोर्जितं स्वच्छं वहतीत्थं महद्वपुः ।। ९

भावाभावविरुद्धोऽपि विचित्रोऽपि महानपि ।

नानन्दाय न खेदाय सतां संसृतिविभ्रमः ।। १०

बुद्ध्यालोकेन साध्येऽस्मिन्वस्तुन्यस्तमितापदि ।

प्रवर्तते न यो मोहात्तं धिगस्तु नराधमम् ।। ११

विश्रान्तिमाप्तुमुचितां चिरमंग दुःख-

रत्नाकरं जननसागरमुत्तितीर्षोः ।

कोऽहं कथं जगदिदं च परं च किं स्या-

त्किं भोगकैरिति मतिः परमोऽभ्युपायः ।। १२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० गलितचित्तलक्षणकथनं नाम षोडशाधिकशततमः सर्गः ।। ११६ ।।